International Journal of Sanskrit Research 2022; 8(6): 49-50

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 49-50
© 2022 IJSR
www.anantaajournal.com
Received: 14-10-2022
Accepted: 17-11-2022

डॉ. आनन्द कुमार प्रियदर्शी
अतिथि शिक्षक, संस्कृत विभाग, आ.एन.आर. कॉलेज, समस्तीपुर, बिहर, भारत

**Corresponding Author:**
डॉ. आनन्द कुमार प्रियदर्शी
अतिथि शिक्षक, संस्कृत विभाग, आ.एन.आर. कॉलेज, समस्तीपुर, बिहर, भारत

# रससूत्रव्याख्याने पण्डितराजस्य योगदानम्

**डॉ. आनन्द कुमार प्रियदर्शी**

## प्रस्तावना

पण्डितराजस्य रससूत्रव्याख्यानमाश्रित्य तदीयं योगदानं किमिति विचारपरोऽयं निवन्धः कतिपर्य रस–सम्बन्धिरहस्यमुद्घाटयितुं क्षमः । रसास्वादः ब्रहमास्यादसमः अपि च साहित्यस्यापि दर्शनत्यमिति मनसि कृत्य पण्डितराजः सूत्रमिदं व्याख्यातीति निपुणमत्र प्रतिपादितम् । एतदूव्याख्यानेऽ भिनवगुप्तमट्टनायकम धीरधिषणया परिशीलिते, नव्यमतेषु च सम्भावना उद्भाविताः इत्येतदद्वयं जगन्नाथस्यात्र विशिष्टयोग–दानत्वेन निरूपितम् ।

विभावाऽनुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति नाट्यशास्त्रस्थं भरतमुने रसरसूत्रम् । एतत् बहुभिः व्याख्यायि । तेषु मुख्या लोल्लट शङ्कुक– भट्टनायकाऽभिनवगुप्ताः । अन्ये केचन नव्यत्वेन परामृष्टाः पण्डित– राजेन । एतेषां व्याख्यानेन पण्डितराजः स्वीयं योगदानं प्रास्तुवत् । तदत्र संक्षेपेण प्रतिपाद्यते । रसास्वादः ब्रह्मास्वादसहोदर (सदृशः) इति प्रायेणलंकारिणां राद्धान्तः । अपि चाऽऽस्तिकदर्शनेषु साहित्य–स्यापि गणनोचितेति पण्डितराजः । एतदुभयं मनसि कृत्यैव रससूत्रं व्याचाख्यौ । एतदर्थमादौ पण्डितराजः अभिनवगुप्ताचार्यस्य रससूत्रव्याख्यानं स्वीचकाराद्वैतमतञ्चोपनिबबन्ध। यद्यप्यभिनवगुप्ताचार्यः नाट्यशास्त्राभिनवभारत्यां व्याख्यायां साहित्यास्तिकतां सूचयन्नाह–

आम्नायसिद्धे किमपूर्वमेतत् ।
संविद्विकासेऽधिगमागमित्वम्’ इति ।

किन्तु एतेन रसास्वादसहोदरत्वे न किमपि उक्तोक्तञ्च पण्डितराजेनेति वक्ष्यते । एतदर्थमेव पण्डितराजेन रसनिरूपणेऽद्वैतपथ आश्रितः । यथा लोके आत्मनि अज्ञानावरणमस्तीति तत्तत्प्राणिनिष्ठरत्यादिः परिच्छिन्नत्वाऽ– साधारणत्वादिविशिष्टः प्रकाशत इति करुणे दुःखित्वादि, भये पलायनादि, क्रोधे वधबन्धनादि उपजायते, नास्वाद– लवोऽपि । किन्तु काव्येऽलौकिकेन भावनाख्यव्यापारमहिम्नाऽऽवरणभङ्गो जायते रत्यादिः अपरिच्छिन्नत्व– साधारणत्वादिधर्मपुरस्कृतो भवति । एवंविधो रत्यादिः लौकिकात्कालदेशादिभ्यो निर्मुक्तस्तदा तं स्वदते सहृदयः स रत्यादिरेव रसशब्देन व्यपदिश्यते । पण्डितराजोऽत्र दृष्टान्तयति यथा शरावादिना पिहितो दीपस्तन्निवृत्तौ सन्निहितान् प्रकाशयति स्वयं प्रकाशते च । एवं प्रतिपाद्यैष आचार्य को रस इति वदन् यथा–

व्यक्तस्स तैर्विभावाद्यैः स्थायी भावो रसः स्मृत’ इति मम्मटवाक्यायनुसारेण चिदवच्छिन्नो रत्यादिरेव रसोऽत्र रति विशेष्यतया चिद्विशेषणतया भासते । किन्तु ‘रसो वै स रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीति ’’ श्रुत्यनुसारेण रत्याद्यवच्छिन्ना चिदेव रसोऽत्र, चिद्विशेष्या रत्यादिर्विशेषणम् । एवञ्च ब्रह्मास्वादसहोदरत्वं सूचितं पण्डिनेन कथमिति चोरामेव केवल रसास्वाद आत्मना सह त्यादिविषयः भारते ब्रह्मविषयकत्वमस्ति।।

आचार्यभट्टनायकस्य भुक्तिवादस्वीकृतः पण्डितराजेन परन्तर साधारणीकरणीय भट्टनायकस्य मते रसोनोने न प्रतीयते भव्यते। अत्र यथाक्रर्म लोक मुपन्यस्तम् । यद्यपि आनन्दनवर्धनेन रससूत्रव्याख्या नाकारि परं रसेऽभिव्यक्तिर। यद्विभावं विना न रसप्रतीतिर्विभावस्य रसे निमित्तत्वात् । विभावरचालम्बनं शकुन्तला सा सामाजिकराम्यति विभावत्यं न स्यात् । तथा च सर्वप्रथमं शकुन्तलादी विभावत्वं सम्पादनीयमतः विमाचतावच्छेदककोटी ‘म निश्चयानालिङि्गताऽगम्यात्वप्रकारकज्ञानविरहःविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकस्मन्निर्वशनीयः। विरहः कथं स्यादिति नानाविकल्पान् विचार्यान्तं भावनाव्यापारेण शकुन्तलाया दुष्यन्तरमव–देश–काल–ह्ययत्रोटनेन शकुन्तलायां गम्यात्वं सम्पाद्यते । अथ विभावादिसम्बन्धेनाविभूती रत्यादिर्मागतव्यायम मु एवमन्त्र रत्यादिभोगो भुज्यमानरत्यादिव रसः अत्र ब्रह्मास्वादसहोदरत्वं रसास्वादस्य को क्रा ‘सोऽयं भोगो विषयसंवलनाद् ब्रह्मास्वादसविभवर्तीत्युच्यते ।’’

इति अथ 'नव्यास्तु' इति वाक्येन नव्यानां मतमारभ्यते जगन्नाथपण्डितेन तत्राय इतन वेदान्ते शुक्तिकायामधिष्ठाने रजतावभासः विषयादिगतचाक चक्यादिदोषजन्यस्तद्वदत्रापि भावनाविशेष यात्मनि दुष्यन्तत्वावभासः । एषोऽवभासः सदसद्विलक्षणः यतः नापि सन् उत्तरश्वापि स विषाणादिवदसन् प्रतीतेरतः सदसद्विलक्षणः । अत्राप्येवमेव ।

नव्येषु तृतीये लोल्लटमतस्य चतुर्थे शङ्कुकमतस्य च संवादोऽस्ति तदुक्तं पण्डितान मुख्य दुष्यन्तादिगत एव रसो रत्यादिः कमनीयविभावाद्यभिनयप्रदर्शनकोविदे दुष्यन्ताद्यनुकतीरे नटे समारोप्य क्षतइत्येकें'' नटगतो रस इति किल लोल्लटमतम्। व्याख्यातारोऽपि लोल्लटमतमित्यभिमन्यन्ते परमसौ लोल्लट प्राचीनतम इति कथं नव्यमतान्तः पाती। चतुर्थे मते रसोऽनुमीयत इत्यवोचदनुमितिवादी श्रीशसुक असावा प्राचीन एव पञ्चमं नव्यमतं विभावादयस्समुदिता रसाः, षष्ठं विभावादिषु पश्चमत्कारी स रस इति मनवममतेषु यथाक्रमं विभाव एव रसः अनुभाव एव रसः व्यभिचारी एव रसः। एवं परितराज रससूत्रत्याख्यान एकादश मतानि निरूत्त्यैतेषां रहस्यमाह यथा

अभिनवगुप्तमतम् विभावानुभावव्यभिचारिभिः संयोगाद् व्यञ्जनात् रसस्य चिदानन्दविशिष्टस्थाप्यात्मनः स्थाय्युपहितचिदात्मनो वा निष्पत्तिः स्वरूपेण प्रकाशयनम्।

भट्टनायकमतम् विभावानुभावव्यभिचारिणां सम्यक्साधारणात्मतया योगाद्भावकत्वव्यापारेण भावनाद्रसस्य स्थाय्युपहितसत्त्वाद्रेकप्र–काशितस्वात्मानन्दरूपस्य निष्पत्तिर्भोगाख्येन साक्षात्कारेण विषयीकृतिः। नव्यमतेष्वादिमत्रयम् – विभावानुभावव्यभिचारिणां संयोगाद् भावनाविशेष रूपादोपाद्रसस्या– निर्वचनीयदुष्यन्तरत्यात्मनो निष्पत्तिरुत्पत्तिः (प्रथमम्) । विभावादीनां संयोगात् ज्ञानात् रसस्य ज्ञानविशेषात्मनो निष्पत्तिरुत्पत्तिः (द्वितीयम्ञ्) । विभावादीनां संबन्धात् रसस्य रत्यादेर्निष्पत्तिः आरोपः (तृतीयम्ञ्) ।

अवशिष्टानां निरूपणम् – विभावादिभिः कृत्रिमैरपि अकृत्रिमतया गृहीतैः संयोगाद् अनुमानात् रसस्य रत्यादेर्निष्पत्तिरनुमितिर्नटादौ पक्ष इति (चतुर्थम्) । विभावादीनां त्रयाणां संयोगात्समुदायात् रसनिष्पत्ती रसपद– व्यवहारः (पञ्चमम्) । विभावादिषु सम्यग्गोचरात् चमत्कारात् (षष्ठम्) । इतः परमेकेन वाक्येनान्तिमं मतत्रयं दूष्यते यथा 'तदेवं पर्यवसितेषु मतेषु सूत्रविरोध' इति ।

इत्थं पण्डितराजः अभिनवगुप्तभट्टनायकमते स्वबुद्धया परिशील्य नव्यमतेषु संभावनां विधाय रससूत्रे स्वीयं योगदानमनुपमं व्यधात्

## सन्दर्भ सूची


1. ना.शा. 6 नाट्यशास्त्रम् भरतमुनिः, प्रकाशकः काशीहिन्दूविश्वविद्यालयीय संस्कृत साहित्यानुसन्धान–समिति, 2012
2. ना.शा. 6 नाट्यशास्त्रम् भरतमुनिः, प्रकाशकः काशीहिन्दूविश्वविद्यालयीय संस्कृत साहित्यानुसन्धान–समिति, 2012, पृ. सं. 650 1
3. रस. ग. रसगंगाधर पृ. सं. 107 108, पण्डितराज काशीहिन्दूविश्वविद्यालय, 2020
4. का. प्र. काव्यप्रकाश
5. तै. उ. तैत्तरीयोपनिषद्
6. रस. ग. पृ. सं. 123 124
7. रस. ग. पृ. सं. 130 1
8. रस. ग. पृ. सं. 147
9. रस. ग. पृ. सं. 150–151 1